PART - V
SANSKRIT

41. अधोलिखितयोः तालिकयोः सम्यक् मेलनं कुरुत –

	क		ख
(a)	बुद्धिनाशात्	(i)	सम्मोहः
(b)	सम्मोहात्	(ii)	बुद्धिनाशः
(c)	क्रोधात्	(iii)	प्रणाशः
(d)	स्मृतिभ्रंशात्	(iv)	स्मृतिभ्रमः

(1) (a)-(iii), (b)-(ii), (c)-(i), (d)-(iv)

(2) (a)-(i), (b)-(iv), (c)-(ii), (d)-(iii)

(3) (a)-(iii), (b)-(iv), (c)-(i), (d)-(ii)

(4) (a)-(iv), (b)-(iii), (c)-(ii), (d)-(i)

42. 'यत्र धूमस्तत्राग्निः' अस्मिन् वाक्ये 'धूमः' किमस्ति ?

(1) हेतुः

(2) प्रतिपक्षः

(3) साध्यम्

(4) पक्षः

43. तर्कभाषानुसारं परिमाणस्य कति भेदाः सन्ति ?

(1) 7

(2) 4

(3) 12

(4) 9

44. भगवद्गीतानुसारं देहिनां स्वभावजा श्रद्धा कीदृशी न भवति ?

(1) तामसी

(2) राजसी

(3) सात्त्विकी

(4) अन्धश्रद्धा

45. तर्कभाषायां इन्द्रियार्थयोस्तु साक्षात्कारिप्रमाहेतु – सन्निकर्षस्य भेदेषु किं न गण्यते ?

(1) संयोगः

(2) संयुक्तसमवायः

(3) अनुमानम्

(4) समवायः

46. वेदान्तसारे 'शीतोष्णादिद्वन्द्वसहिष्णुता' – इति कस्य परिभाषा वर्तते ?

(1) योगः

(2) वैराग्यम्

(3) तितिक्षा

(4) शमः

47. आचार्य मम्मटानुसारं अधोलिखितेषु किं लक्षणायाः लक्षणं न वर्तते ?

(1) रूढिः प्रयोजनं च

(2) संकेतित-अर्थः

(3) मुख्यार्थबाधः

(4) तद्योगः

48. काव्यप्रकाशे प्रदत्ते काव्यलक्षणे अधोलिखितेषु का विशेषता न प्रतिपादिता ?

(1) दीर्घसमासौ

(2) अनलङ्कृती पुनः क्वापि

(3) अदोषौ

(4) सगुणौ

49. काव्यप्रकाशानुसारं व्यभिचारिभावानां संख्या अस्ति –

(1) 17

(2) 42

(3) 33

(4) 51

50. 'जनान्तिकम्' – इत्यस्यां स्थित्यां एका मुद्रा प्रयुज्यते, अधोलिखितेषु इयं सा अस्ति –

(1) मत्तवारणी

(2) अंगुष्ठानामिके

(3) चिन्मुद्रा

(4) त्रिपताकाकरः

51. अभिधाद्यासु विरतासु यया वृत्त्या अर्थो बोध्यते, सा वृत्तिः कथ्यते –

(1) काव्यप्रतिभा

(2) औचित्यम्

(3) व्यञ्जना

(4) लक्षणलक्षणा

52. आलम्बनं उद्दीपनं च कस्य भेदाः सन्ति?

(1) तात्पर्यार्थस्य

(2) विभावस्य

(3) लक्षणायाः

(4) स्थायिभावस्य

53. काव्यप्रकाशकारेण स्थायिभावानां संख्या 'अष्ट' प्रतिपादि अधोलिखितेषु कः स्थायिभावः न भवति?

(1) निर्वेदः

(2) विस्मयः

(3) रतिः

(4) जुगुप्सा

54. अधोलिखितयोः तालिकयोः सम्यक् मेलनं कुरुत –

	क		ख
(a)	रणन-सिद्धान्तः	(i)	हैया-हैया
(b)	आवेग-सिद्धान्तः	(ii)	पट-पट
(c)	श्रम-सिद्धान्तः	(iii)	नादः
(d)	ध्वन्यनुकरण-सिद्धान्तः	(iv)	धिक्

(1) (a)-(iv), (b)-(iii), (c)-(i), (d)-(ii)

(2) (a)-(iv), (b)-(iii), (c)-(ii), (d)-(i)

(3) (a)-(iii), (b)-(iv), (c)-(i), (d)-(ii)

(4) (a)-(iii), (b)-(ii), (c)-(i), (d)-(iv)

55. काव्यप्रकाशानुसारं डिम्भादेः स्वक्रियारूप-वर्णनम् कस्मि अलंकारे प्राप्यते?

(1) स्वभावोक्तिः

(2) काव्यलिङ्गम्

(3) व्याजस्तुतिः

(4) छेकानुप्रासः

56. यत्र स्वरवैसादृश्येऽपि व्यञ्जनसदृशत्वं दृश्यते, त ________ अलंकारः भवति। रिक्तं स्थानं पूरयत।

(1) यमकः

(2) अनुप्रासः

(3) विशेषोक्तिः

(4) उपमा

57. ध्वनिपरिवर्तनस्य दिक्षु (क्षेत्रेषु) अधोलिखितेषु किं न समाविष्टम्?

(1) सन्धि-कार्य:

(2) जनमानसिकता

(3) आगम:

(4) घोषीकरणम्

58. काव्यप्रकाशे परिसंख्यालङ्कारस्य कति भेदा: निर्दिष्टा:?

(1) 3

(2) 6

(3) 7

(4) 4

59. अधोलिखितयो: तालिकयो: समुचितं मेलनं कुरुत –

	क		ख
(a)	'उपान्वध्याङ्वस:'	(i)	पञ्चमीविभक्ति:
(b)	'सहयुक्तेऽप्रधाने'	(ii)	सप्तमीविभक्ति:
(c)	'भीत्रार्थानांभयहेतु:'	(iii)	कर्मसंज्ञा
(d)	'यतश्चनिर्धारणम्'	(iv)	तृतीयाविभक्ति:

(1) (a)-(iv), (b)-(iii), (c)-(ii), (d)-(i)

(2) (a)-(i), (b)-(ii), (c)-(iii), (d)-(iv)

(3) (a)-(iii), (b)-(ii), (c)-(iv), (d)-(i)

(4) (a)-(iii), (b)-(iv), (c)-(i), (d)-(ii)

60. अधोलिखितेषु 'पुनरावृत्ति:' – इत्यस्य अर्थपरिवर्तनस्य उदाहरणं किमस्ति?

(1) विन्ध्याचल-पर्वत

(2) श्रेष्ठ > सेठ

(3) ऑटो-रिक्शा > आटो

(4) गृहपति:

61. शुद्धतया वाक्यानाम् उच्चारणं कस्य प्रति संकेतं करोति?

(1) व्याकरणनियमानां प्रयोग:

(2) श्रवणकौशलम्

(3) धाराप्रवाहिता

(4) स्पष्टलेखनम्

62. तृतीयकक्षाया: एका अध्यापिका छात्रान् कानिचित् चित्राणि प्रदर्श्य तदाधारितां लघु-कथां लिखितुं निर्दिशति। अनेन छात्राणां कस्य संवर्धने साहाय्यं भवति?

(1) रचनात्मकलेखनम्

(2) अनुवादकला

(3) स्मरणशक्ति:

(4) श्रवणकौशलम्

63. पठनस्य अधोगामी-उपागम: (Bottom down approach) इत्यस्य प्राधान्यक्रम: अस्ति –

(a) ध्वनि: (Sound)

(b) वर्णम् (Syllable)

(c) वाक्यम् (Sentence)

(d) शब्द: (Word)

(e) अक्षरम् (Letter)

(1) (e), (d), (c), (b), (a)

(2) (c), (d), (b), (e), (a)

(3) (b), (c), (a), (e), (d)

(4) (a), (b), (c), (d), (e)

64. एकः बालकः भाषायाः लेखने, सम्भाषणे च काठिन्यं अनुभवति, तस्य एकाग्रताशक्तिः सम्यक् नास्ति, सः च निर्देशान् अनुकर्तुम् समर्थः नास्ति। एतानि कस्य लक्षणानि सन्ति ?

(1) डिस्कैल्कुलिया (Dyscalculia)

(2) डिसर्थिया (Dysarthia)

(3) डिस्फेज़िया (Dysphasia)

(4) डिस्लेक्सिया (Dyslexia)

65. मिश्रितछात्रयोग्यतया सम्पन्नभाषाकक्षायां किं महत्त्वपूर्णं वर्तते ?

(1) अधिकाङ्कान् प्राप्तुं विशिष्ट कक्षायाः आयोजनम्

(2) छात्राणां समस्यानां समाधानं प्राप्तुं मनोचिकित्सकेन सह मेलनम्

(3) गृहकार्यस्य पूर्त्यर्थम् अभिभावकैः सह मेलनम्

(4) विभिन्न-प्रायोजनात्मक-गतिविधिनां आयोजनं यत्र छात्राः परस्परं विमर्श्य कार्यं कुर्वन्ति, सामाजिक-कौशलानि च शिक्षन्ते

66. निम्नलिखितेषु एकस्य लेखनकार्यस्य सम्यक् अवस्थाक्रमं चिनुत -

(1) प्रारूपनिर्धारणम् → अशुद्धिशोधनम् → सम्पादनम् → टङ्कनम् → प्रकाशनम्

(2) सम्पादनम् → टङ्कनम् → प्रारूपनिर्धारणम् → अशुद्धिशोधनम् → प्रकाशनम्

(3) प्रारूपनिर्धारणम् → टङ्कनम् → अशुद्धिशोधनम् → सम्पादनम् → प्रकाशनम्

(4) टङ्कनम् → अशुद्धिशोधनम् → प्रारूपनिर्धारणम् → सम्पादनम् → प्रकाशनम्

67. एकः पठनविधिः यस्मिन् छात्राः कमपि लघुपाठं गम्भीरतया, सूक्ष्मतया च पठित्वा अधिकाधिकं अवबोधं प्राप्नुवन्ति, कथ्यते -

(1) गहनपठनम् (Intensive Reading)

(2) क्रमवीक्षणम् (Scanning)

(3) व्यापकपठनम् (Extensive Reading)

(4) द्रुतपठनम् (Skimming)

68. नॉम चॉमस्की (Noam Chomsky) महोदयस्य मतानुसारं वयं सर्वे भाषायाः __________ कृते सहजातसामर्थ्यं धार्यामः। अधोलिखितेषु उचिततमं पदं चित्वा रिक्तस्थानं पूरयत -

(1) अधिग्रहणस्य (Acquisition)

(2) अधिगमस्य (Learning)

(3) अनुकरणस्य (Imitation)

(4) अनुवादस्य (Translation)

69. आगमनात्मक-विधिः (Inductive Method) कस्यार्थं प्रयुज्यते ?

(1) समस्यायाः अवबोधनम्

(2) समस्यायाः निर्माणम्

(3) सिद्धान्त-उपस्थापनम् (Formula establishing)

(4) सिद्धान्तसाहाय्येन समस्यायाः समाधानम्

70. सकारात्मकं नकारात्मकं वा पुनर्बलनम् - (Positive/ Negative reinforcement) इति सिद्धान्तः केन प्रतिपादितः ?

(1) वायगोत्स्की (Vygotsky)

(2) स्किनर (Skinner)

(3) कोलबर्ग (Kohlberg)

(4) कात्यायान (Katyayana)

71. 'राष्ट्रीय शिक्षा नीति 2020' - अनुसारं विद्यालयेषु पाठ्यक्रमः शिक्षणशास्त्रः च कीदृशः न भवेत् ?

(1) तनावयुक्तः

(2) रुचिकरः

(3) एकीकृतः

(4) आनन्ददायी

72. 'NEP 2020' - इत्यस्याः समितेः अध्यक्षः कः अस्ति ?

(1) उर्जित पटेलः

(2) सी. रङ्गाराजनः

(3) डॉ. के. कस्तूरीरञ्जनः

(4) कैलाश सत्यार्थी

73. 'राष्ट्रीय शिक्षा नीति 2020' इत्यस्यां विद्यालयीय-पाठ्यक्रमस्य नवीनप्रारूपं अस्ति -

(1) 5+3+4+3

(2) 2+5+4+4

(3) 4+5+3+2

(4) 5+3+3+4

74. 'NEP 2020' - इत्यस्याः मूलभूत सिद्धान्तेषु अधोलिखितेषु कः न समाविष्टः ?

(1) निजीशैक्षणिकसंस्थानां वृद्धिः

(2) जीवनकौशलम्

(3) बहुभाषिकता

(4) शैक्षिकप्रणाल्याः पारदर्शिता

75. 'राष्ट्रीय शिक्षा नीति 2020' अनुसारं पञ्चम-कक्षा पर्यन्तं शिक्षामाध्यमः कः न भवेत् ?

(1) राष्ट्रभाषा

(2) विदेशीभाषा

(3) मातृभाषा

(4) स्थानीयभाषा

76. अधोलिखितेषु कालिदासस्य काव्यानां का विशेषता नास्ति ?

(1) बीभत्सरसः

(2) भावप्रधानता

(3) प्रसादगुणः

(4) उपमा

77. नलचम्पू - इत्यस्य काव्यस्य कथायाः मूलस्रोतः महाभारतस्य __________ अस्ति। उचितं उत्तरं चित्वा रिक्तस्थानं पूरयत।

(1) उद्योगपर्वः

(2) भीष्मपर्वः

(3) वनपर्वः

(4) अनुशासनपर्वः

78. 'स पुरुषः तं विहङ्गमं शुकमादाय -' अस्मिन् वाक्ये 'विहङ्गमं' शब्दस्य कोऽर्थः ?

(1) पक्षिणम्

(2) सरसम्

(3) अद्भुतम्

(4) विस्तृतम्

23166423

79. 'बाणविरचितस्य हर्षचरित' इत्यस्य गद्यकाव्यस्य कथानकः कीदृशः वर्तते ?

(1) पौराणिकः

(2) आधुनिकः

(3) लौकिकः

(4) ऐतिहासिकः

80. 'नलचम्पू' इत्यस्य काव्यस्य नायिका अस्ति –

(1) शकुन्तला

(2) दमयन्ती

(3) कर्पूरमञ्जरी

(4) अलकनन्दा

81. 'वीरपूजासिद्धान्तः' कस्य उत्पत्तिविषयकः वर्तते ?

(1) व्याकरणशास्त्रम्

(2) नाटकः

(3) रसः

(4) गद्यकाव्यः

82. अधोलिखितेषु नाटकेषु किम् महाकविभासविरचितं नास्ति ?

(1) स्वप्नवासवदत्तम्

(2) चारुदत्तम्

(3) मालतीमाधवम्

(4) प्रतिमानाटकम्

83. शिशुपालवधस्य प्रथमे अङ्के आकाशात् कस्य अवतरणं वर्णितम् ?

(1) मेघः

(2) अग्निः

(3) सूर्यः

(4) नारदमुनिः

84. अधोलिखितेषु सुभाषितवाक्येषु अभिज्ञान–शाकुन्तलस्य चतुर्थे अङ्के किं न प्राप्यते –

(1) प्रमाणमन्तःकरणप्रवृत्तयः — 1

(2) सरसिजमनुविद्धं शैवलेनापि रम्यम् — 1

(3) अनार्य परदारव्यवहारः — 7 ?

(4) अर्थो हि कन्या परकीय एव — 4

85. 'आरभ्य' – इत्यस्मिन् पदे कः प्रत्ययः प्रयुक्तः ?

(1) अनीयर्

(2) ल्यप्

(3) यत्

(4) घञ्

86. मृच्छकटिकनाटके वसन्तसेना बालकरोहसेनस्य शकटिकां केन पूरयति ?

(1) वस्त्रैः

(2) पुस्तकैः

(3) स्वर्णालङ्कारैः

(4) मिष्ठान्नेन

87. निम्नलिखितेषु किं महाकाव्यस्य लक्षणं न वर्तते ?

(1) अङ्कनिबद्धः

(2) आशीर्वादात्मकः प्रारम्भः

(3) सर्गबद्धः

(4) धीरोदात्त–नायकः

88. मृच्छकटिकम् नाटकं कस्य कवेः रचना अस्ति ?

(1) भट्टनारायणः

(2) विशाखदत्तः

(3) भवभूतिः

(4) शूद्रकः

89. अधोलिखितेषु किं पुरुषं आत्मनः स्वरूपं प्रदर्श्य निवर्तते ?

(1) माया

(2) प्रकृतिः

(3) इन्द्रजालः

(4) पृथिवी

90. सांख्यदर्शनानुसारं अधोलिखितेषु कः पुरुषस्य धर्मः न अस्ति ?

(1) माध्यस्थ्यम्

(2) द्रष्टृत्वम्

(3) साक्षित्वम्

(4) कर्तृत्वम्

91. गीतिकाव्यं कस्मिन् विषये आधारितं न वर्तते ?

(1) देवस्तुतिः

(2) युद्धः

(3) वैराग्यम्

(4) ऋतुवर्णनम्

92. 'अन्तवन्त इमे देहाः नित्यस्योक्ताः शरीरिणः' – वाक्यमेतत् भगवद्गीतायाः कस्मिन् अध्याये उद्धृतम् ?

(1) 2

(2) 15

(3) 11

(4) 6

93. 'गाथा – सप्तशती' गीतिकाव्यम् कस्यां भाषायां रचितम् ?

(1) मागधी

(2) फारसी

(3) संस्कृतम्

(4) प्राकृतम्

94. अधोलिखितयोः तालिकयोः सम्यक् मेलनं कुरुत –

	क		ख
(a)	बाणभट्टः	(i)	शिवराजविजयः
(b)	अम्बिकादत्तव्यासः	(ii)	दशकुमारचरितम्
(c)	सुबन्धुः	(iii)	कादम्बरी
(d)	दण्डी	(iv)	वासवदत्ता

(1) (a)-(iv), (b)-(iii), (c)-(ii), (d)-(i)

(2) (a)-(iii), (b)-(i), (c)-(ii), (d)-(iv)

(3) (a)-(i), (b)-(ii), (c)-(iii), (d)-(iv)

(4) (a)-(iii), (b)-(i), (c)-(iv), (d)-(ii)

95. निम्नलिखितेषु कः कविः 'अर्थगौरवम्' इत्यनया विशिष्ट अलङ्कृतः अस्ति ?

(1) श्रीहर्षः

(2) क्षेमेन्द्रः

(3) भारविः

(4) अश्वघोषः

96. 'कर्तृ करणे कृता बहुलम्' इत्यस्य समास–विधायकसूत्र समुचितं उदाहरणम् चिनुत –

(1) चोरभयम्

(2) नखभिन्नः

(3) राजदन्तः

(4) अतिमालः

97. 'स्वाहा' – इत्यस्य पदस्य सन्दर्भे कस्याः विभक्त्याः प्रयो क्रियते ?

(1) चतुर्थी

(2) षष्ठी

(3) सप्तमी

(4) द्वितीया

98. 'स्पृहेरीप्सित:' अस्य सूत्रस्य सम्यक् उदाहरणम् वर्तते –

(1) पुष्पाणि स्पृहयति

(2) पुष्पै: स्पृहयति

(3) पुष्पेभ्य: स्पृहयति

(4) पुष्पेषु स्पृहयति

99. 'अकथितं च' अस्मिन् सूत्रे अधोलिखितेषु क: धातु: न गण्यते?

(1) मथ्

(2) क्रीड्

(3) शास्

(4) पच्

100. निम्नलिखितेषु किं तत्पुरुषसमासस्य उदाहरणम् नास्ति?

(1) पीताम्बर:

(2) नीलोत्पलम्

(3) कृष्णश्रित:

(4) अक्षशौण्ड:

101. अधोलिखितयो: तालिकयो: समुचितं मेलनं कुरुत –

	क		ख
(a)	ख	(i)	एय्
(b)	ढ	(ii)	आयन्
(c)	फ	(iii)	ईय्
(d)	छ	(iv)	ईन्

(1) (a)-(iv), (b)-(i), (c)-(ii), (d)-(iii)

(2) (a)-(iii), (b)-(ii), (c)-(iv), (d)-(i)

(3) (a)-(iv), (b)-(i), (c)-(iii), (d)-(ii)

(4) (a)-(i), (b)-(ii), (c)-(iii), (d)-(iv)

102. 'विद्वानानां मनेषु भगवानस्य कीदृश: कल्पना वर्तति' – अस्मिन् वाक्ये अशुद्धिसंशोधनं कृत्वा उपयुक्तं विकल्पं चिनुत –

(1) विद्वानानां मन:सु भगवत: कीदृशी कल्पना वर्तति

(2) विदुषां मन:सु भगवत: कीदृशी कल्पना वर्तते

(3) विदुषां मनांसि भगवत: कीदृशी कल्पना वर्तते

(4) विदुषां मन:सु भगवानस्य कीदृशी कल्पना वर्तते

103. 'मयूरा: उद्याने नृत्यन्ति।' अस्मिन् वाक्ये शुद्धं वाच्यपरिवर्तनं किं भवेत्?

(1) मयूरै: उद्याने नृत्यन्ते

(2) मयूरै: उद्याने नृत्यन्ति

(3) मयूरा: उद्यानेन नृत्यन्ति

(4) मयूरै: उद्याने नृत्यते

104. 'स्मृत्वा स्मृत्वा' अत्र स्मृ धातो: वीप्सायां 'ण्मुल्' प्रत्यय: प्रयुक्त:। अत्र द्वित्वं केन सूत्रेण भवति?

(1) 'आतो युच्'

(2) 'गुरोश्च हल:'

(3) 'नित्य-वीप्सयो:'

(4) 'कर्मणि द्वितीया'

105. 'काल-समय-वेला' इत्येतेषु उपपदेषु कस्य प्रत्ययस्य प्रयोग: क्रियते?

(1) ल्यप्

(2) शानच्

(3) क्त्वा

(4) तुमुन्

106. 'यस्य नास्ति स्वयं प्रज्ञा, शास्त्रः तस्य करोति किम्' – अस्यां सूक्त्यां कस्य विषये चर्चा कृता ?

(1) मूर्खः

(2) बुद्धिः

(3) विद्वान्

(4) चिकित्सकः

107. √भू धातोः लुट्लकारे, प्रथमपुरुषे कानि रूपाणि भवन्ति ?

(1) बभूव बभूवतुः बभूवुः

(2) भविता भवितारौ भवितारः

(3) भवतु भवताम् भवन्तु

(4) अभवम् अभवाव अभवाम

108. यत् सर्वश्राव्यं भवति अर्थात् रङ्गमंचस्थितैः सर्वैः पात्रैः यस्य श्रवणं अभीष्टं वर्तते, तत् ज्ञायते –

(1) स्वगतम्

(2) नान्दी

(3) प्रकाशम्

(4) अपवारितम्

109. 'उपराजम्' अस्मिन् उदाहरणे 'उप राजन्' अस्यां स्थित्यां टेः (अन्) लोपः केन सूत्रेण भवति ?

(1) 'लशक्वतद्धिते'

(2) 'ढ्रलोपे पूर्वस्य दीर्घोऽणः'

(3) 'नस्तद्धिते'

(4) 'हलन्त्यम्'

110. यस्मिन् नाटकस्य कथावस्तु प्रस्तूयते, एवं नटी विदूषको पारिपार्श्वकः वा सूत्रधारेण सहिताः संलापं कुर्वते, तत् कथ्यते –

(1) जनान्तिकः

(2) पूर्वरङ्गः

(3) अङ्कावतारः

(4) प्रस्तावना

111. रुधादिगणस्य धातुभ्यः कस्य विकरणस्य प्रयोगः क्रियते ?

(1) श्नम्

(2) श्यन्

(3) शप्

(4) श्लु

112. यः जनः ब्राह्मणः, वृद्धः, अन्तःपुरचरः, गुणी, सर्वकार्य-कुशलः च भवति, स अभिधीयते –

(1) विदूषकः

(2) कञ्चुकी

(3) नायकः

(4) सूत्रधारः

113. अधोलिखितयोः तालिकयोः सूक्ति-रचना आधारितं सम्यक् मेलनं कुरुत –

क		ख	
(a)	सत्यमेव जयते नानृतम्	(i)	अभिज्ञान शाकुन्तलम्
(b)	नासतो विद्यते भावः	(ii)	यजुर्वेदः
(c)	अर्थो हि कन्या परकीय एव	(iii)	मुण्डकोपनिषद्
(d)	तन्मे मनः शिवसंकल्पमस्तु	(iv)	भगवद्गीता

(1) (a)-(iv), (b)-(iii), (c)-(ii), (d)-(i)
(2) (a)-(i), (b)-(iii), (c)-(iv), (d)-(ii)
(3) (a)-(iii), (b)-(iv), (c)-(i), (d)-(ii)
(4) (a)-(iii), (b)-(i), (c)-(ii), (d)-(iv)

114. 'जुहुयात्-जुहुयाताम्-जुहयुः' इति हु धातोः कस्य लकारस्य रूपाणि सन्ति ?

(1) लिट्
(2) आशीर्लिङ्
(3) लृट्
(4) विधिलिङ्

115. 'किमिव हि मधुराणां मण्डनं नाकृतीनाम्' – अस्याः सूक्तेः कोऽभिप्रायः अस्ति ?

(1) मधुरस्वरूपाणां सर्वमेव अलङ्करणं भवति
(2) मधुराकृतीनां जनानां अलंकराणि बहुमूल्यानि भवन्ति
(3) मधुराणां आकृतीनां किमपि अलंकरणं न भवति
(4) मधुरस्वरूपयुक्तेभ्यः जनेभ्यः अलंकराणि रोचन्ते

116. 'चेतव्यः' अस्मिन् पदे कः प्रत्ययः प्रयुक्तः ?

(1) यत्
(2) तव्यत्
(3) ण्यत्
(4) अनीयर्

3 - N.A
-12 Wm

117. अधोलिखितेषु सूत्रेषु किं स्त्रीप्रत्ययविधायकं सूत्रं न वर्तते

(1) 'षिद्-गौराऽऽदिभ्यश्च'
(2) 'शार्ङ्गरवाऽऽद्यञो ङीन्'
(3) 'अजाऽऽद्यतष्टाप्'
(4) 'अज्ञाते'

118. 'युवोरनाकौ' अस्य सूत्रस्य वृत्तिः भवेत् –

(1) 'यु वु' एतयोः अनाऽकौ स्तः
(2) वशादेः कृत इण् न स्यात्
(3) 'यु वु' एतयोः 'अनाऽकौ' न भवतः
(4) एभ्यः कः स्यात्

119. 'मातुलानी' – अस्मिन् पदे 'आनुक्' इति वैकल्पिकः आगम केन वार्तिकेन भवति ?

(1) आम् अनडुहः स्त्रियां वा
(2) आर्य-क्षत्रियाभ्यां वा स्वार्थे
(3) यवनात् लिप्याम्
(4) मातुलोपाध्याययोः आनुक् वा

120. भुक्त्वा-अस्मिन् पदे भुज् धातोः 'क्त्वा' प्रत्ययस्य प्रयोग केन सूत्रेण कृतः ?

(1) 'अन्येभ्योऽपि दृश्यन्ते'
(2) 'दृशेः क्वनिप्'
(3) 'समान-कर्तृकयोः पूर्वकाले'
(4) 'कर्तरि कृत्'

80 - 3 = 77
= 73